# Natya Shastra Chapter 25

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૫

## Document Information

Text title : naaTyashaastra adhyaaya 25

File name : natya25.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : November 23, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 24, 2024

*sanskritdocuments.org*

# Natya Shastra Chapter 25

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૫

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

પઞ્ચવિંશોઽધ્યાયઃ ।

અઙ્ગાભિનયસ્યૈવ યો વિશેષઃ ક્વચિત્ ક્વચિત્ ।
અનુક્ત ઉચ્યતે ચિત્રઃ ચિત્રાભિનયસ્સ્મૃતઃ ॥ ૧॥

ઉત્તાનૌ તુ કરૌ કૃત્વા સ્વસ્તિકૌ પાર્શ્વસંસ્થિતૌ ।
ઉદ્વાહિતેન શિરસા તથા ચોર્ધ્વનિરીક્ષણાત્ ॥ ૨॥

પ્રભાતં ગગનં રાત્રિઃ પ્રદોષં દિવસં તથા ।
ઋતૂન્ ઘનાન્ વનાન્તાંશ્ચ વિસ્તીર્ણાંશ્ચ જલાશયાન્ ॥ ૩॥

દિશો ગ્રહાન્ સનક્ષત્રાન્ કિઞ્ચિત્ સ્વસ્થં ચ યદ્ભવેત્ ।
તસ્ય ત્વભિનયઃ કાર્યો નાનાદૃષ્ટિસમન્વિતઃ ॥ ૪॥

એભિરેવ કરૈર્ભૂયસ્તેનૈવ શિરસા પુનઃ ।
અધો નિરીક્ષણેનાથ ભૂમિસ્થાન્ સમ્પ્રદર્શયેત્ ॥ ૫॥

સ્પર્શસ્ય ગ્રહણેનૈવ તથોલ્લુકસનેન ચ ।
ચન્દ્રજ્યોસ્નાં સુખં વાયું રસં ગન્ધં ચ નિર્દિશેત્ ॥ ૬॥

વસ્ત્રાવકુણ્ઠનાત્સૂર્યં રજોધૂમાનિલાંસ્તથા ।
ભૂમિતાપમથોષ્ણં ચ કુર્યાચ્છાયાભિલાષતઃ ॥ ૭॥

ઊર્ધ્વાકેકરદૃષ્ટિસ્તુ મધ્યાહ્ને સૂર્યમાદિશેત્ ।
ઉદયાસ્તગતં ચૈવ વિસ્મયાર્થૈઃ પ્રદર્શયેત્ ॥૮॥

યાનિ સૌમ્યાર્થયુક્તાનિ સુસ્વભાવકૃતાનિ ચ ।
ગાત્રસ્પર્શૈસ્સરોમાઞ્ચૈસ્તેષામભિનયો ભવેત્ ॥ ૯॥

યાનિ સ્યુસ્તીક્ષ્ણરૂપાણિ તાનિ ચાભિનયેત્સુધીઃ ।

અસંસ્પર્શૈસ્તથોદ્વેગૈસ્તથા મુખવિકુણ્ઠનૈઃ ॥ ૧૦॥

ગમ્ભીરોદાતસંયુક્તાનર્થાનભિનયેદ્બુધઃ ।
સાટોપૈશ્ચ સગર્વૈશ્ચ ગાત્રૈઃ સૌષ્ઠવસંયુતૈઃ ॥ ૧૧॥

યજ્ઞોપવીતદેશસ્થમરાલં હાસમાદિશેત્ ।
સ્વસ્તિકૌ વિચ્યુતૌ હારસ્રગ્દામાર્થાન્ નિદર્શયેત્ ॥ ૧૨॥

ભ્રમણેન પ્રદર્શિન્યા દૃષ્ટેઃ પરિગમેન ચ ।
અલપદ્મકપીડાયાઃ સર્વાર્થગ્રહણં ભવેત્ ॥ ૧૩॥

શ્રવ્યં શ્રવણયોગેન દૃશ્યં દૃષ્ટિવિલોકનૈઃ ।
આત્મસ્થં પરસંસ્થં વા મધ્યસ્થં વા વિનિર્દિશેત્ ॥ ૧૪॥

વિદ્યુદુલ્કાઘનરવાવિષ્ફુલિંગાર્ચિષસ્તથા ।
ત્રસ્તાંગાક્ષિનિમેષૈશ્ચ તેઽભિનેયાઃ પ્રયોક્તૃભિઃ ॥ ૧૫॥

ઉદ્વેષ્ટિતકરાવૃત્તૌ કરૌ કૃત્વા નતં શિરઃ ।
અસંસ્પર્શો તથાનિષ્ટે જિહ્મદૃષ્ટેન કારયેત્ ॥ ૧૬॥

વાયુમુષ્ણં તમસ્તેજો મુખપ્રચ્છાદનેન ચ ।
રેણુતોયપતંગાંશ્ચ ભ્રમરાંશ્ચ નિવારયેત્ ॥ ૧૭॥

કૃત્વા સ્વસ્તિકસંસ્થાનૌ પદ્મકોશાવધોમુખૌ ।
સિંહર્ક્ષવાનરવ્યાઘ્રશ્વાપદાંશ્ચ નિરૂપયેત્ ॥૧૮॥

સ્વસ્તિકૌ ત્રિપતાકૌ તુ ગુરૂણાં પાદવન્દને ।
ખટકસ્વસ્થિકૌ ચાપિ પ્રતોદગ્રહણે સ્મૃતૌ ॥ ૧૯॥

એકં દ્વિ ત્રીણિ ચત્વારિ પઞ્ચ ષટ્ સપ્ત ચાષ્ટધા ।
નવ વા દશ વાપિ સ્યુર્ગણનાંગુલિભિર્ભવેત્ ॥ ૨૦॥

દશાખ્યાશ્ચ શતાખ્યાશ્ચ સહસ્રાખ્યાસ્તથૈવ ચ ।
પતાકાભ્યાં તુ હસ્તાભ્યાં પ્રયોજ્યાસ્તાઃ પ્રયોક્તૃભિઃ ॥ ૨૧॥

દશાખ્યગણનાયાસ્તુ પરતો યા ભવેદિહ ।
વાક્યાર્થેનૈવ સાધ્યાસૌ પરોક્ષાભિનયેન ચ ॥ ૨૨॥

છત્રધ્વજપતાકાશ્ચ નિર્દેશ્યા દણ્ડધારણાત્ ।
નાનાપ્રહરણં ચાથ નિર્દેશ્યં ધારણાશ્રયમ્ ॥ ૨૩॥

એકચિત્તો હ્યધોદૃષ્ટિઃ કિઞ્ચિન્નતશિરાસ્તથા ।
સવ્યહસ્તશ્ચ સંદંશઃ સ્મૃતે ધ્યાને વિતર્કિતે ॥ ૨૪॥

ઉદ્વાહિતં શિરઃ કૃત્વા હંસપક્ષૌ પ્રદક્ષિણૌ ।
અપત્યરૂપણે કાર્યાવુચ્છ્રયૌ ચ પ્રયોક્તૃભિઃ ॥ ૨૫॥

ઉદ્વાહિતં શિરઃ કૃત્વા હંસવક્ત્રં તથોર્ધ્વગમ્ ।
પ્રસાદયચ્ચ યં માનં દીર્ઘસત્વં ચ નિર્દિશેત્ ॥ ૨૬॥

અરાલં ચ શિરસ્થાને સમુદ્વાહ્ય તુ વામકમ્ ।
ગતે નિર્વૃત્તે ધ્વસ્તે ચ શ્રાન્તવાક્યે ચ યોજયેત્ ॥ ૨૭॥

સર્વેન્દ્રિયસ્વસ્થતયા પ્રસન્નવદનસ્તથા ।
વિચિત્રભૂતલાલોકૈઃ શરદન્તુ વિનિર્દિશેત્ ॥ ૨૮॥

ગાત્રસંકોચનાચ્ચાપિ સૂર્યાગ્નિપટુસેવનાત્ ।
હેમન્તસ્ત્વભિનેતવ્યઃ પુરુષૈર્મધ્યમાધમૈઃ ॥ ૨૯॥

શિરોદન્તોષ્ઠકમ્પેન ગાત્રસંકોચનેન ચ ।
કૂજિતૈશ્ચ સશીત્કારૈરધમશ્શીતમાદિશેત્ ॥ ૩૦॥

અવસ્થાન્તરમાસાદ્ય કદાચિત્તૂત્તમરૈરપિ ।
શીતાભિનયનં કૂર્યાદ્દૈવાદ્વ્યસનસંભવમ્ ॥ ૩૧॥

ઋતુજાનાં તુ પુષ્પાણાં ગન્ધઘ્રાણૈસ્તથૈવ ચ ।
રૂક્ષસ્ય વાયોઃ સ્પર્શાચ્ચ શિશિરં રૂપયેદ્બુધઃ ॥ ૩૨॥

પ્રમોદજનનારંભૈરુપભોગૈઃ પૃથગ્વિધૈઃ ।
વસન્તસ્ત્વભિનેતવ્યો નાનાપુષ્પપ્રદર્શનાત્ ॥ ૩૩॥

સ્વેદ પ્રમાર્જનૈશ્ચૈવ ભૂમિતાપૈઃ સવીજનૈઃ ।
ઉષ્ણસ્ય વાયોઃ સ્પર્શેન ગ્રીષ્મં ત્વભિનયેદ્બુધઃ ॥ ૩૪॥

કદમ્બનીપકુટપૈઃ શાદ્વલૈઃ સેન્દ્રગોપકૈઃ ।
મેઘવાતૈઃ સુખસ્પર્શૈઃ પ્રાવૃટ્કાલં પ્રદર્શયેત્ ॥ ૩૫॥

મેઘૌઘનાદૈર્ગમ્ભીરૈર્ધારાપ્રપતનૈસ્તદા ।
વિદ્યુન્નિર્ઘાતઘોષૈશ્ચ વર્ષારાત્રં સમાદિશેત્ ॥ ૩૬॥

યદ્યસ્ય ચિહ્નં વેષો વા કર્મ વા રૂપમેવ વા ।
નિર્દેશ્યઃ સ ઋતુસ્તેન ઇષ્ટાનિષ્ટાર્થદર્શનાત્ ॥ ૩૭॥

એતાનૃતૂનર્થવશાદ્દર્શયેદ્ધિ રસાનુગાન્ ।
સુખિનસ્તુ સુખોપેતાન્ સુઃખાર્થાન્ દુઃખસંયુતાન્ ॥ ૩૮॥

યો યેન ભાવેનાવિષ્ટઃ સુખદેનેતરેઅન વા ।
સ તદાહિતસંકારઃ સર્વં પશ્યતિ તન્મયમ્ ॥ ૩૯॥

ભાવાભિનયનં કુર્યાદ્વિભાવાનાં નિદર્શનૈઃ ।
તથૈવ ચાનુભાવાનાં ભાવસિદ્ધિઃ પ્રવર્તિતા ॥ ૪૦॥

વિભાવેનાહૃતં કાર્યમનુભાવેન નીયતે ।
આત્માનુભવનં ભાવો વિભાવઃ પરદર્શનમ્ ॥ ૪૧॥

ગુરુર્મિત્રં સખા સ્નિગ્ધઃ સંબન્ધી બન્ધુરેવ વા ।
આવેદ્યતે હિ યઃ પ્રાપ્તઃ સ વિભાવ ઇતિ સ્મૃતઃ ॥ ૪૨॥

યત્ત્વસ્ય સંભ્રમોત્થાનૈરર્ઘ્યપાદ્યાસનાદિભિઃ ।
પૂજનં ક્રિયતે ભક્ત્યા સોઽનુભાવઃ પ્રકીર્તિતઃ ॥ ૪૩॥

એવમન્યેષ્વપિ જ્ઞેયો નાનાકાર્યપ્રદર્શનાત્ ।
વિભાવો વાપિ ભાવો વા વિજ્ઞેયોઽર્થવશાદ્બુધૈઃ ॥ ૪૪॥

યસ્ત્વપિ પ્રતિસંદેશો દૂતસ્યેહ પ્રદીયતે ।
સોઽનુભાવ ઇતિ જ્ઞેયઃ પ્રતિસન્દેશદર્શિતઃ ॥ ૪૫॥

એવં ભાવો વિભાવો વાપ્યનુભાવશ્ચ કીર્તિતઃ ।
પુરુષૈરભિનેયઃ સ્યાત્પ્રમદાભિરથાપિ વા ॥ ૪૬॥

સ્વભાવાભિનયે સ્થાનં પુંસાં કાર્યં તુ વૈષ્ણવમ્ ।
આયતં વાવહિત્થં વા સ્ત્રીણાં કાર્યં સ્વભાવતઃ ॥ ૪૭॥

પ્રયોજનવશાચ્ચૈવ શેષાણ્યપિ ભવન્તિ હિ ।
નાનાભવાભિનયનૈઃ પ્રયોગૈશ્ચ પૃથગ્વિધૈઃ ॥ ૪૮॥

ધૈર્યલીલાઙ્ગસમ્પન્નં પુરુષાણાં વિચેષ્ટિતમ્ ।
મૃદુલીલાઙ્ગહારૈશ્ચ સ્ત્રીણાં કાર્યં તુ ચેષ્ટિતમ્ ॥ ૪૯॥

કરપાદાઙ્ગસચ્ચારાસ્સ્ત્રીણાં તુ લલિતાઃ સ્મૃતાઃ ।
સુધીરશ્ચોદ્ધતશ્ચૈવ પુરુષાણાં પ્રયોક્તૃભિઃ ॥ ૫૦॥

યથા રસં યથા ભાવં સ્ત્રીણાં ભાવપ્રદર્શનમ્ ।

નરાણાં પ્રમદાનાં ચ ભાવાભિનયનં પૃથક્ ॥ ૫૧॥

ભાવાનુભાવનં યુક્તં વ્યાખ્યાસ્યામ્યનુપૂર્વશઃ ।
આલિઙ્ગનેન ગાત્રાણાં સસ્મિતેન ચ ચક્ષુષા ॥ ૫૨॥

તથોલ્લુકસાનચ્ચાપિ હર્ષં સંદર્શયેન્નરઃ ।
ક્ષિપ્રસ!ન્જાતરોમાગ્ચાત્ બાષ્પેણાવૃતલોચના ॥ ૫૩॥

કુર્વીત નર્તકી હર્ષં પ્રીત્યા વાક્યૈશ્ચ સસ્મિતૈઃ ।
ઉદ્વૃત્તરક્તનેત્રશ્ચ સન્દષ્ટાધર એવ ચ ॥ ૫૪॥

નિશ્વાસકંપિતાંગશ્ચ ક્રોધં ચાભિનયેન્નરઃ ।
નેત્રાભ્યાં બાષ્પપૂર્ણાભ્યાં ચિબુકૌષ્ઠપ્રકંપનાત્ ॥ ૫૫॥

શિરસઃ કંપનાચ્ચૈવ ભ્રુકુટીકરણેન ચ ।
મૌનેનાઙ્ગુલિભઙ્ગેન માલ્યાભરણવર્જનાત્ ॥ ૫૬॥

આયતકસ્થાનકક્ષાયા ઈર્ષ્યા ક્રોધે ભવેત્સ્ત્રિયાઃ ।
નિશ્વાસોચ્છ્વાસબહુલૈરધોમુખવિચિન્તનૈઃ ॥ ૫૭॥

આકાશવચનાચ્ચાપિ દુઃખં પુંસાં તુ યોજયેત્ ।
રુદિતૈઃ શ્વસિતૈશ્ચૈવ શિરોભિહનનેન ચ ॥ ૫૮॥

ભૂમિપાતાભિઘાતૈશ્ચ દુઃખં સ્ત્રીષુ પ્રયોજયેત્ ।
આનન્દજં ચાર્તિજં વા ઈર્ષ્યાસંભૂતમેવ વા ॥ ૫૯ ॥

યત્પૂર્વમુક્તં રુદિતં તત્સ્ત્રીનીચેષુ યોજયેત્ ।
સંભ્રમાવેગચેષ્ટાભિશ્શસ્ત્રસમ્પાતનેન ચ ॥ ૬૦ ॥

પુરુષાણાં ભયં કાર્યં ધૈર્યાવેગબલાદિભિઃ ।
ચલતારકનેત્રત્વાદ્ગાત્રૈઃ સ્ફુરિતકમ્પિતૈઃ ॥ ૬૧॥

સન્ત્રસ્તહૃદયત્વાચ્ચ પાર્શ્વાભ્યામવલોકનૈઃ ।
ભર્તૃરન્વેષણાચ્ચૈવમુચ્ચૈરાક્રન્દનાદપિ ॥ ૬૨॥

પ્રિયસ્યાલિંગનાચ્ચૈવ ભયં કાર્યં ભવેત્સ્ત્રિયાઃ ।
મદા યેઽભિહિતાઃ પૂર્વં તે સ્ત્રીનીચેષુ યોજયેત્ ॥ ૬૩॥

મૃદુભિઃ સ્ખલિતૈર્નિત્યમાકાશસ્યાવલંબનાત્ ।
નેત્રાવઘૂર્ણનૈશ્ચૈવ સાલસ્યૈઃ કથિતૈસ્તથા ॥ ૬૪॥

ગાત્રાણાં કંપનૈશ્ચૈવ મદઃ કાર્યો ભવેત્સ્ત્રિયાઃ ।
અનેન વિધિના કાર્યઃ પ્રયોગાઃ કારણોત્થિતાઃ ॥ ૬૫॥

પૌરુષઃ સ્ત્રીકૃતો વાપિ ભાવા હ્યભિનયં પ્રતિ ।
સર્વે સલલિતા ભાવાસ્સ્ત્રીભિઃ કાર્યાઃ પ્રયત્નતઃ ॥ ૬૬॥

ધૈર્યમાધુર્યસમ્પન્ના ભાવાઃ કાર્યાસ્તુ પૌરુષાઃ ।
ત્રિપતાકાઙ્ગુલીભ્યાં તુ વલિતાભ્યાં પ્રયોજયેત્ ॥ ૬૭॥

શુકાશ્ચ સારિકાશ્ચૈવ સૂક્ષ્મા યે ચાપિ પક્ષિણઃ ।
શિખિસારસહંસાદ્યાઃ સ્થૂલા યેઽપિ સ્વભાવતઃ ॥ ૬૮॥

રેચકૈરઙ્ગહારૈશ્ચ તેષામભિનયો ભવેત્ ।
ખરોષ્ટ્રાશ્વતરાસિંહવ્યાઘ્રગોમહિષાદય ॥ ૬૯॥

ગતિપ્રચરૈરઙ્ગૈશ્ચ તેઽભિનેયાઃ પ્રયોક્તૃભિઃ ।
ભૂતાઃ પિશાચા યક્ષાશ્ચ દાનવાઃ સહરાક્ષસૈઃ ॥ ૭૦॥

અઙ્ગહારૈરવિનિર્દેશ્યા નામસંકીર્તનાદપિ ।
અઙ્ગહારૈર્વિનિર્દેશ્યા અપ્રત્યક્ષા ભવન્તિ યે ॥ ૭૧॥

પ્રત્યક્ષાસ્ત્વભિનેતવ્યા ભયોદ્વેગૈઃ સવિસ્મયૈઃ ।
દેવાશ્ચ ચિહ્નૈશ્ચ પ્રણામકરણૈર્ભાવૈશ્ચ વિચેષ્ટિતૈઃ ॥ ૭૨॥

અભિનેયો હ્યર્થવશાદપ્રત્યક્ષાઃ પ્રયોગજ્ઞૈઃ ।
સવ્યોત્થિતેન હસ્તેન હ્યરાલેન શિરઃ સ્પૃશેત્ ॥ ૭૩॥

નરેઽહ્યભિવાદનં હ્યેતદપ્રત્યક્ષે વિધીયતે ।
ખટકાવર્ધમાનેન કપોતાખ્યેન વા પુનઃ ॥ ૭૪॥

દૈવતાનિ ગુરૂંશ્ચૈવ પ્રમદાશ્ચાભિવાદયેત્ ।
દિવૌકસશ્ચ યે પૂજ્યાઃ પ્રત્યક્ષાશ્ચ ભવન્તિ યે ॥ ૭૫॥

તાન્ પ્રમાણૈઃ પ્રભાવૈશ્ચ ગંભીરાર્થૈશ્ચ યોજયેત્ ।
મહાજનં સખીવર્ગં વિટધૂર્તજનં તથા ॥ ૭૬॥

પરિમણ્ડલસંસ્થેન હસ્તેનાભિનયેન્નરઃ ।
પર્વતાન્ પ્રાંશુયોગેન વૃક્ષાંશ્ચૈવ સમુચ્છ્રિતાન્ ॥ ૭૭॥

પ્રસારિતાભ્યાં બાહુભ્યામુત્ક્ષિપ્તાભ્યાં પ્રયોજયેત્ ।
સમૂહસાગરં સેના બહુવિસ્તીર્ણમેવ ચ ॥ ૭૮॥

પતાકાભ્યાં તુ હસ્તાભ્યામુત્ક્ષિપ્તાભ્યાં પ્રદર્શયેત્ ।
શૌર્યં ધૈર્યં ચ ગર્વં ચ દર્પમૌદાર્યમુચ્છ્રયમ્ ॥ ૭૯॥

લલાટદેશસ્થાનેન ત્વરાલેનાભિદર્શયેત્ ।
વક્ષોદેશાદપાવિદ્ધૌ કરૌ તુ મૃગશીર્ષકૌ ॥ ૮૦॥

વિસ્તીર્ણપ્રદ્રુતોત્ક્ષેપૌ યોજ્યૌ યસ્યાદપાવૃતમ્ ।
અધોમુખોત્તાનતલૌ હસ્તૌ કિઞ્ચિત્પ્રસારિતૌ ॥ ૮૧॥

કૃત્વા ત્વભિનયેદ્વેલાં બિલદ્વારં ગૃહં ગુહાન્ ।
કામં શાપગ્રહગ્રસ્તાન્ જ્વરોપહતચેતસઃ ॥ ૮૨॥

એતેષાં ચેષ્ટિતં કુર્યાદઙ્ગાદ્યૈઃ સદૃશૈર્બુધૈઃ ।
દોલાભિનયનં કુર્યાદ્દોલાયાસ્તુ વિલોકનૈઃ ॥ ૮૩॥

સંભોક્ષેણ ચ ગાત્રાણાં રજ્જ્વશ્વાગ્રહણેન ચ ।
યદા ચાઙ્ગવતી ડોલા પ્રત્યક્ષા પુસ્તજા ભવેત્ ॥ ૮૪॥

આસનેષુ પ્રવિષ્ટાનાં કર્તવ્યં તત્ર ડોલનમ્ ।
આકાશવચનાનીહ વક્ષ્યામ્યાત્મગતાનિ ચ ॥ ૮૫॥

અપવારિતકં ચૈવ જનાન્તિકમથાપિ ચ ।
દૂરસ્થાભાષણં યત્સ્યાદશરીરનિવેદનમ્ ॥ ૮૬॥

પરોક્ષાન્તરિતં વાક્યમાકાશવચનં તુ તત્ ।
તત્રોત્તરકૃતૈર્વાક્યૈઃ સંલાપં સમ્પ્રયોજયેત્ ॥ ૮૭॥

નાનાકારણસંયુક્તૈઃ કાવ્યભાવસમુત્થિતૈઃ ।
હૃદયસ્ય વચો યત્તૂ તદાત્મગતમીષ્યતે ॥ ૮૮॥

સવિતર્કં ચ તદ્યોજ્યં પ્રાયશો નાટકાદિષુ ।
નિગૂઢભાવસંયુક્તમપવારિતકં સ્મૃતમ્ ॥ ૮૯॥

કાર્યવશાદશ્રવણં પાર્શ્વગતૈર્યજ્જનાન્તિકં તત્સ્યાત્ ।
હૃદયસ્થં સવિકલ્પં ભાવસ્થં ચાત્મગતમેવ ॥ ૯૦॥

ઇતિ ગૂઢાર્થયુક્તાનિ વચનાનીહ નાટકે ।
જનાન્તિકાનિ કર્ણે તુ તાનિ યોજ્યાનિ યોક્તૃભિઃ ॥ ૯૧॥

પૂર્વવૃત્તં તુ યત્કાર્યં ભૂયઃ કથ્યં તુ કારણાત્ ।

કર્ણપ્રદેશે તદ્વાચ્યં માગાત્તત્પુનરુક્તતામ્ ॥ ૮૨ ॥

અવ્યભિચારેણ પઠેદાકાશજનાન્તિકાત્મગતપાઠ્યમ્ ।
પ્રત્યક્ષપરોક્ષકૃતાનામાત્મસમુત્થાન્ પરકૃતાંશ્ચ ॥ ૯૩ ॥

હસ્તમન્તરિતં કૃત્વા ત્રિપતાકં પ્રયોક્તૃભિઃ ।
જનાન્તિકં પ્રયોક્તવ્યમપવારિતકં તથા ॥ ૯૪ ॥

સ્વપ્નાયિતવાક્યાર્થૈસ્ત્વભિનેયો ન ખલુ હસ્તસંચારૈઃ ।
સુપ્તાભિહિતૈરેવ તુ વાક્યાર્થૈઃ સોઽભિનેયઃ સ્યાત્ ॥ ૯૫ ॥

મન્દસ્વરસઞ્ચારૈર્વ્યક્તાવ્યક્તં પુનરુક્તવચનાર્થમ્ ।
પૂર્વાનુસ્મરણકૃતં કાર્યં સ્વપ્નાઞ્ચિતે પાઠ્યમ્ ॥ ૯૬ ॥

પ્રશિથિલગુરુકરુણાક્ષરઘણ્ટાનુસ્વરિતવાક્યગદ્ગદજૈઃ ।
હિક્કાશ્વસોપેતાં કાકું કુર્યાન્મરણકાલે ॥ ૯૭ ॥

હિક્કાશ્વાસોપેતાં મૂર્ચ્છોપગમે મરણવત્કથયેત્ ।
અતિમત્તેષ્વપિ કાર્યં તદ્વત્સ્વપ્નાયિતે યથા પાઠ્યમ્ ॥ ૯૮ ॥

વૃદ્ધાનાં યોજયેત્પાઠ્યં ગદ્ગદસ્ખલિતાક્ષરમ્ ।
અસમાપ્તાક્ષરં ચૈવ બાલાનાં તુ કલસ્વનમ્ ॥ ૯૯ ॥

નાનાભાવોપગતં મરણાભિનયે બહુકીર્તિતં તુ ।
વિક્ષિપ્તહસ્તપાદૈર્નિભૃતૈઃ સન્નૈસ્તથા કાર્યમ્ ॥ ૧૦૦ ॥

વ્યાધિપ્લુતે ચ મરણં નિષણ્ણગાત્રૈસ્તુ સમ્પ્રયોક્તવ્યમ્ ।
હિક્કાશ્વાસોપેતં તથા પરાધીનગાત્રસંચારમ્ ॥ ૧૦૧ ॥

વિષપીતેઽપિ ચ મરણં કાર્યં વિક્ષિપ્તગાત્રકરચરણમ્ ।
વિષવેગસમ્પ્રયુક્તં વિસ્ફુરિતાંગક્રિયોપેતમ્ ॥ ૧૦૨ ॥

પ્રથેમે વેગે કાર્શ્યં ત્વભિનેયે વેપથુર્દ્વિતીયે તુ ।
દાહસ્તથા તૃતીયે વિલલ્લિકા સ્યાચ્ચતુર્થે તુ ॥ ૧૦૩ ॥

ફ્રેનસ્તુ પઞ્ચમસ્થે તુ ગ્રીવા ષષ્ઠે તુ ભજ્યતે ।
જડતા સપ્તમે તુ સ્યાન્મરણં ત્વષ્ટમે ભવેત્ ॥ ૧૦૪ ॥

તત્ર પ્રથમવેગે તુ ક્ષામવક્ત્રકપોલતા ।
કૃશત્વેઽભિનયઃ કાર્યો વાક્યાનામલ્પભાષણમ્ ॥ ૧૦૫ ॥

સર્વાઙ્ગવેપથું ચ કણ્ડૂયનં તથાઙ્ગાનામ્ ।
વિક્ષિપ્તહસ્તગાત્રં દાહં ચૈવાપ્યભિનયેત્તુ ॥ ૧૦૬॥

ઉદ્વૃત્તનિમેષત્વાદુદ્ગારચ્છર્દનૈસ્તથાક્ષેપૈઃ ।
અવ્યક્તાક્ષરકથનૈઃ વિલલ્લિકામભિનયેદેવમ્ ॥ ૧૦૭॥

ઉદ્ગારવમનયોગૈઃ શિરસશ્ચ વિલોલનૈરનેકવિધૈઃ ।
ફેનસ્ત્વભિનેતવ્યો નિઃસંજ્ઞતયા નિમેષૈશ્ચ ॥ ૧૦૮॥

અંસકપોલસ્પર્શઃ શિરસોઽથ વિનામનં શિરોઽપાઙ્ગઃ ।
સર્વેન્દ્રિઅયસંમોહાજ્જડતામેવં ત્વભિનયેત્તુ ॥ ૧૦૯॥

સંમીલિતનેત્રત્વાત્ વ્યાધિવિવૃદ્ધૌ ભુજઙ્ગદશનાદ્વા ।
એવં હિ નાટ્યધર્મે મરણાનિ બુધૈઃ પ્રયોજ્યાનિ ॥ ૧૧૦॥

સંભ્રમેષ્વથ રોષેષુ શોકાવેશકૃતેષુ ચ ।
યાનિ વાક્યાનિ યુજ્યન્તે પુનરુક્તં ન તેષ્વિહ ॥ ૧૧૧॥

સાધ્વહો માં ચ હેહેતિ કિં ત્વં મામાવદેતિ ચ ।
એવંવિધાનિ કાર્યાણિ દ્વિત્રિસંખ્યાનિ કારયેત્ ॥ ૧૧૨॥

પ્રત્યઙ્ગહીનં યત્કાવ્યં વિકૃતં  ચ પ્રયુજ્યતે ।
ન લક્ષણકૃતસ્તત્ર કાર્યસ્ત્વભિનયો બુધૈઃ ॥ ૧૧૩॥

ભાવો યત્રોત્તમાનાં તુ ન તં મધ્યેષુ યોજયેત્ ।
યો ભાવશ્ચૈવ મધ્યાનાં ન તે નીચેષુ યોજયેત્ ॥ ૧૧૪॥

પૃથક્ પૃથગ્ભાવરસૈરાત્મચેષ્ટાસમુત્થિતૈઃ ।
જ્યેષ્ઠમધ્યમનીચેષુ નાટ્યં રાગં હિ ગચ્છતિ ॥ ૧૧૫॥

એતેઽભિનયવિશેષાઃ કર્તવ્યાઃ સત્ત્વભાવસંયુક્તાઃ ।
અન્યે તુ લૌકિકા  યે તુ તે સર્વે લોકવત્કાર્યાઃ ॥ ૧૧૬॥

નાનાવિધૈર્યથા પુષ્પૈર્માલાં ગ્રથ્નાતિ માલ્યકૃત્ ।
અંગોપાંગૈ રસૈર્ભાવૈસ્તથા નાટ્યં પ્રયોજયેત્ ॥ ૧૧૭॥

યા યસ્ય લીલા નિયતા ગતિશ્ચ
રઙ્ગપ્રવિષ્ટસ્ય નિધાનયુક્તઃ ।
તામેવ કુર્યાદવિમુક્તસત્ત્વો
યાવન્નરઙ્ગાત્પ્રતિનિર્વૃતઃ સ્યાત્ ॥ ૧૧૮॥

એવમેતે મયા પ્રોક્તા નાટ્યે ચાભિનયાઃ ક્રમાત્ ।
અન્યે તુ લૌકિકા યે તે લોકાદ્ગ્રાહ્યાઃ સદા બુધૈઃ ॥ ૧૧૯॥

લોકો વેદસ્તથાધ્યાત્મં પ્રમાણં ત્રિવિધં સ્મૃતમ્ ।
વેદાધ્યાત્મપદાર્થેષુ પ્રાયો નાટ્યં પ્રતિષ્ઠિતમ્ ॥ ૧૨૦॥

વેદાધ્યાત્મોપપન્નં તુ શબ્દચ્છન્દસ્સમન્વિતમ્ ।
લોકસિદ્ધં ભવેત્સિદ્ધં નાટ્યં લોકાત્મકં તથા ॥ ૧૨૧॥

ન ચ શક્યં હિ લોકસ્ય સ્થાવરસ્ય ચરસ્ય ચ ।
શાસ્ત્રેણ નિર્ણયં કર્તું ભાવચેષ્ટાવિધિં પ્રતિ ॥ ૧૨૨॥

નાનાશીલાઃ પ્રકૃતયઃ શીલે નાટ્યં પ્રતિષ્ઠિઅતમ્ ।
તસ્માલ્લોકપ્રમાણં હિ વિજ્ઞેયં નાટ્યયોક્તૃભિઃ ॥ ૧૨૩॥

એતાન્ વિધીંશ્ચાભિનયસ્ય સમ્યગ્વિજ્ઞાય
રઙ્ગે મનુજઃ પ્રયુઙ્ક્તે ।
સ નાટ્યતત્ત્વાભિનયપ્રયોક્તા
સંમાનમગ્ર્યં લભતે હિ લોકે ॥ ૧૨૪॥

એવમેતે હ્યભિનયા વાઙ્નેપથ્યાઙ્ગસંભવાઃ
પ્રયોગજ્ઞેન કર્તવ્યા નાટકે સિદ્ધિમિચ્છતા ॥ ૧૨૫॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે ચિત્રાભિનયો નામ
પઞ્ચવિંશોઽધ્યાયઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 25*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*